# धर्मे धमनं पापे पुण्यम

**प्रश्नः 1. एकपदेन उत्तरं लिखत**–(एक पद में उत्तर लिखिए–)

(क) व्याधस्य नाम किम् आसीत्?

(ख) चञ्चलः व्याघ्रं कुत्र दृष्टवान्?

(ग) विस्तृते जाले कः बद्धः आसीत्।

(घ) बदरी-गुल्मानां पृष्ठे का निलीना आसीत्?

(ङ) अनारतं कूर्दनेन कः श्रान्तः अभवत्?

**उत्तरम्**– (क) चंचलः, (ख) वने (जाले), (ग) व्याघ्रः, (घ) लोमशिका, (ङ) व्याघ्रः।

**प्रश्नः 2. संस्कृतेन उत्तरत**–(संस्कृत में उत्तर दीजिए–)

(क) चञ्चलेन वने किं कृतम्?

(ख) व्याघ्रस्य पिपासा कथं शान्ता अभवत्?

(ग) जलं पीत्वा व्याघ्रः किम् अवदत्?

(घ) चञ्चलः 'मातृस्वसः!' इति कां सम्बोधितवान्?

(ङ) जाले पुनः बद्धं व्याघ्रं दृष्ट्वा व्याधः किम् अकरोत्?

**उत्तरम्**– (क) चंचलेन वने जालं विस्तारितम्।

(ख) व्याघ्रस्य पिपासा जलं पीत्वा शान्ता अभवत्।

(ग) जलं पीत्वा व्याघ्रः अवदत्–'साम्प्रतम् अहम् बुभुक्षितः अस्मि, इदानीम् अहं त्वां खादिष्यामि।'

(घ) चंचलः 'मातृस्वसः!' इति लोमशिकाम् सम्बोधितवान्।

(ङ) जाले पुनः बद्धं व्याघ्रं दृष्ट्वा व्याधः प्रसन्नः भूत्वा गृहं प्रत्यावर्तत।

**प्रश्नः 3. अधोलिखितानि वाक्यानि कः/का कं/कां प्रति कथयति**–(निम्नलिखित वाक्यों को किसने, किसको कहे/किसके लिए कहे–)

| | कः/का | कं/कां |
|---|---|---|
| **यथा**–इदानीम् अहं त्वां खादिष्यामि। | व्याघ्रः | व्याधम् |
| (क) कल्याणं भवतु ते। | .................. | .................. |
| (ख) जनाः मयि स्नानं कुर्वन्ति। | .................. | .................. |
| (ग) अरे मूर्ख! धर्मे धमनं पापे पुण्यं भवति एव। | .................. | .................. |
| (घ) यत्र कुत्रापि छेदनं कुर्वन्ति। | .................. | .................. |
| (ङ) सम्प्रति पुनः पुनः कूर्दनं कृत्वा दर्शय। | .................. | .................. |

**उत्तरम्**–

| | कः/का | कम्/काम् |
|---|---|---|
| (क) | व्याघ्रः | व्याधम् |
| (ख) | नदीजलम् | चंचलम् (व्याधम्) |
| (ग) | व्याघ्रः | व्याधम् |
| (घ) | वृक्षः | चंचलम् (व्याधम्) |
| (ङ) | लोमशिका | व्याघ्रम् |

**प्रश्नः 4. सन्धिं कृत्वा लिखत**–(सन्धि करके लिखिए–)

मृग + आदीनाम् = ..................

तथा + एव = ..................

कुत्र + अपि = ..................

बुभुक्षितः + अस्मि = ..................

प्रति + आ + अवर्तत = ..................

**उत्तरम्**– मृगादीनाम्, तथैव, कुत्रापि, बुभुक्षितोऽस्मि, प्रत्यावर्तत।

**प्रश्नः 5. उदाहरणानुसारं रिक्तस्थानानि पूरयत**–(उदाहरण के अनुसार रिक्त स्थानों की पूर्ति कीजिए–)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **यथा–** मातृ (प्रथमा) | माता | मातरौ | मातरः |
| स्वसृ (प्रथमा) | .................... | .................... | .................... |
| मातृ (तृतीया) | मात्रा | मातृभ्याम् | मातृभिः |
| स्वसृ (तृतीया) | .................... | .................... | .................... |
| स्वसृ (सप्तमी) | स्वसरि | स्वस्रोः | स्वसृषु |
| मातृ (सप्तमी) | .................... | .................... | .................... |
| स्वसृ (षष्ठी) | स्वसुः | स्वस्रोः | स्वसॄणाम् |
| मातृ (षष्ठी) | .................... | .................... | .................... |

**उत्तरम्–**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| स्वसृ (प्रथमा) | स्वसा | स्वसारौ | स्वसारः |
| स्वसृ (तृतीया) | स्वस्रा | स्वसृभ्याम् | स्वसृभिः |
| मातृ (सप्तमी) | मातरि | मात्रोः | मातृषु |
| मातृ (षष्ठी) | मातुः | मात्रोः | मातॄणाम् |

**प्रश्नः 6. मञ्जूषातः पदानि चित्वा कथां पूरयत**–(मञ्जूषा से पदों का चयन करके कथा को पूरा कीजिए–)

| | | | | |
|---|---|---|---|---|
| दृष्ट्वा | स्वकीयैः | कृतवान् | कर्तनम् | वृद्धः |
| साट्टहासम् | तर्हि | क्षुद्रः | मोचयितुम् | अकस्मात् |

एकस्मिन् वने एकः ....................व्याघ्रः आसीत्। सः एकदा व्याधेन विस्तारिते जाले बद्धः अभवत्। सः बहुप्रयासं....................किन्तु जालात् मुक्तः नाभवत्। ....................तत्र एकः मूषकः समागच्छत्। बद्धं व्याघ्रं....................सः तम् अवदत्–अहो! भवान् जाले बद्धः। अहं त्वां....................इच्छामि। तच्छ्रुत्वा व्याघ्रः ....................अवदत्–अरे! त्वं .................... जीवः मम सहाय्यं करिष्यसि। यदि त्वं मां मोचयिष्यसि....................अहं त्वां न हनिष्यामि। मूषकः ....................लघुदन्तैः तज्जालं....................कृत्वा तं व्याघ्रं बहिः कृतवान्।

**उत्तरम्–** वृद्धः, कृतवान्, अकस्मात्, दृष्ट्वा, मोचयितुम्, साट्टहासम्, क्षुद्रः, तर्हि, स्वकीयैः, कर्तनम्।

**प्रश्नः 7. धातुं प्रत्ययं च लिखत**–(धातु और प्रत्यय लिखिए–)

| | पदानि | = | धातुः | | प्रत्ययः |
|---|---|---|---|---|---|
| **यथा–** | गन्तुम् | = | गम् | + | तुमुन् |
| | द्रष्टुम् | = | .................... | + | .................... |
| | करणीय | = | .................... | + | .................... |
| | पातुम् | = | .................... | + | .................... |
| | खादितुम् | = | .................... | + | .................... |
| | कृत्वा | = | .................... | + | .................... |

**उत्तरम्–** दृश् + तुमुन्, कृ + अनीयर्, पा + तुमुन्, खाद् + तुमुन्, कृ + क्त्वा।

## अतिरिक्तः अभ्यासः

**(1) पाठांशम् पठित्वा तदाधारितान् प्रश्नान् उत्तरत**–(पाठांश पढ़कर उस पर आधारित प्रश्नों के उत्तर दीजिए–)

आसीत् कश्चित् चञ्चलो नाम व्याधः। पक्षिमृगादीनां ग्रहणेन सः स्वीयां जीविकां निर्वाहयति स्म।। एकदा सः वने जालं विस्तीर्य गृहम् आगतवान्। अन्यस्मिन् दिवसे प्रातःकाले यदा चञ्चलः वनं गतवान् तदा सः दृष्टवान् यत् तेन विस्तारिते जाले दौर्भाग्याद् एकः व्याघ्रः बद्धः आसीत्। सोऽचिन्तयत्, 'व्याघ्रः मां खादिष्यति अतएव पलायनं करणीयम्।'

**I. एकपदेन उत्तरत–**

1. चञ्चलो नाम कः आसीत्? ______________
2. सः केषां ग्रहणेन जीविकां निर्वायति स्म? ______________
3. सः वने किं विस्तृतवान? ______________
4. व्याघ्रः कस्मिन् बद्धः? ______________

**II. पूर्णवाक्येन उत्तरत–**

1. व्याधः कदा व्याघ्रं जाले बद्धम दृष्टवान्?
2. व्याघ्रां बद्धं दृष्ट्वा व्याधः किम् अचिन्तयत्?

**III. भाषिककार्यम्**

**'आसीत् कश्चित् चञ्चलो नाम व्याधः'–इति वाक्ये**

1. 'आसीत्' क्रियापदस्य कर्त्ता कः?__________ (कश्चित्, चञ्चल, व्याधः)
2. 'एकः व्याघ्रः'–अत्र किं विशेषणम्?__________
3. पर्यायम् लिखत। अरण्ये= __________
4. विभक्तिवचनम् लिखत। (*i*) दैर्भाग्यात् ______ ______ (*ii*) अन्यस्मिन् ______ ______
5. सः वने जालं विस्तीर्य गृहम् आगतवान्–इति वाक्ये किं किं कर्मपदम्?
   (*i*) __________ (*ii*) __________
6. उपसर्गं चित्वा लिखत। (*i*) विस्तीर्य ______ (*ii*) निर्वाहयति ______ (*iii*) आगतवान् ______
7. अनयोः पदयोः कः धातुः? विस्तीर्य, विस्तारिते __________ (स्तर्, स्तृ, विस्तृ)

**उत्तरम्–**

**I.** 1. व्याधः 2. पक्षिमृगादीनाम् 3. जालम् 4. जाले

**II.** 1. अन्यस्मिन् दिवसे प्रातःकाले यदा व्याधः वनं गतवान् तदा सः व्याघ्रं जाले बद्धं दृष्टवान्।
2. व्याधः अचिन्तयत्–व्याघ्रः मां खादिष्यति अत एव पलायनं करणीयम् इति।

**III.** 1. व्याधः 2. एकः 3. वने 4. (*i*) पञ्मी एकवचनम् (*ii*) सप्तमी एकवचनम्
5. (*i*) जालम् (*ii*) गृहम् 6. (*i*) वि (*ii*) निः/निर् (*iii*) आ 7. स्तृ

**(2) पूर्णवाक्येन अधोदत्तान् प्रश्नान् उत्तरत**–(निम्नलिखित प्रश्नों के उत्तर सम्पूर्ण वाक्य में दीजिए–)

1. जाले बद्धः व्याघ्रः व्याधम्र किमवदत्?
2. जनाः नदीजले किं किं कुर्वन्ति?
3. जनाः वृक्षेभ्यः कथं कष्टं ददति?
4. चञ्चलः लोमशिकायै किम् असूचयत्?

**उत्तरम्–** 1. जाले बद्धः व्याघ्रः व्याधम् अवदत्–भो मानव! कल्याणं ते भवतु। यदि त्वं मां मोचयिष्यसि तर्हि अहं त्वां न हनिष्यामि इति।
2. जनाः नदी-जले स्नानं कुर्वन्ति, वस्त्राणि प्रक्षालयन्ति, मलमूत्रादिकं च विसृजन्ति।
3. जनाः वृक्षान् कुठारैः प्रहृत्य तेभ्यः कष्टं ददति।
4. व्याधः लोमशिकायै असूचयत्–मया अस्य व्याघ्रस्य प्राणाः रक्षिताः परम् एषः मामेव खादितुम् इच्छति इति।

**(3) कः/का कम्/काम् प्रति कथयति?** (कौन किससे कहता/कहती है?)

| | कः/का | कम्/काम् प्रति |
|---|---|---|
| 1. यदि त्वं मां मोचयिष्यसि तर्हि अहं त्वां न हनिष्यामि। | ............ | ...................... |
| 2. अहं त्वत्कृते धर्मम् आचरितवान्। | ............ | ...................... |
| 3. मानवाः अस्माकम् छायायां विरमन्ति। | ............ | ...................... |
| 4. का वार्ता, मामपि विज्ञापय। | ............ | ...................... |
| 5. सम्प्रति पुनः कूर्दनं कृत्वा दर्शय। | ............ | ...................... |

**उत्तरम्–**

| कः/का | कम्/काम् प्रति |
|---|---|
| 1. व्याघ्रः | व्याधम् |
| 2. व्याधः | व्याघ्रम |

3. वृक्षः । व्याधम्/चञ्चलम्

4. लोमशिका चञ्चलम्/व्याधम्

5. लोमशिका व्याघ्रम

**(4) (क) पदानि पृथक् कुरुत–**(पदों को पृथक् कीजिए–)

1. जलमानीय = ____ + ____ 2. द्रष्टुमिच्छामि = ____ + ____

3. प्राणभिक्षामिव = ____ + ____ 4. समाचरत् = ____ + ____

5. एवमेव = ____ + ____

**उत्तरम्–** (क) 1. जलम् + आनीय 2. द्रष्टुम् + इच्छति 3. प्राणभिक्षाम् + इव 4. सम् + आचरत् 5. एवम् + एव

**(ख) सन्धिं विच्छेदं वा कुरुत।**

1. न्यवेदयत् = ____ + ____ 2. प्र + अविशत् = ____

3. कः + चित् = ____ 4. तदनन्तरम् = ____ + ____

5. सोऽचिन्तयत् = ____ + ____

**उत्तरम्–** (ख) 1. नि + अवेदयत् 2. प्राविशत् 3. कश्चित् 4. तत् + अनन्तरम् 5. सः + अचिन्तयत्

**(5) अधोदत्तानि वाक्यानि घटनाक्रमेण योजयत–**(निम्नलिखित वाक्यों को घटनाक्रम के अनुसार लगाइए–)

1. व्याधः जालं प्रासारयत्।
2. व्याधः लोमशिकार्य निखिलां कथां न्यवेदयत्।
3. जाले पुनः तम् बद्धं दृष्ट्वा सः व्याधः प्रसन्नः सन् गृहम् आगच्छत्।
4. सा अवदत्–बाढ़म्। अहं पुनः व्याघ्रं जाले बद्धं द्रष्टुम इच्छामि।
5. लोमशिका व्याघ्रम् अवदत्–सत्यं त्वया भणितम्।
6. लोमशिका अवदत्–पुनः कूर्दनं कृत्वा दर्शय इति।
7. निःसहायः भूत्वा सः प्राणभिक्षामिव अयाचत।
8. व्याघ्रः तं वृत्तान्तं दर्शयितुम् पुनः जाले प्राविशत्।

**उत्तरम्–**
1. व्याधः लोमशिकायै निखिलां कथां निवेदितवान्।
2. सा अवदत्–बाढ़म्! अहं पुनः व्याघ्रं जाले बद्धं द्रष्टुम् इच्छामि।
3. व्याधः जालं प्रासारयत्।
4. व्याघ्रः तं वृत्तान्तं दर्शयितुं पुनः जाले प्राविशत्।
5. लोमशिका अवदत्–पुनः कूर्दनं कृत्वा दर्शय इति।
6. निःसहायः भूत्वा सः प्राणिभिक्षामिव अयाचत।
7. लोमशिका व्याघ्रम् अवदत्–सत्यम् त्वया भणितम्।
8. जाले पुनः तं बद्धं दृष्ट्वा सः व्याधः प्रसन्नः सन् गृहम् आगच्छत।

## बहुविकल्पीयप्रश्नाः

**(1) प्रदत्तविकल्पेभ्यः उचितं पदं चित्वा वाक्यपूर्तिं कुरुत–**(दिए गए विकल्पों से उचित शब्द चुनकर वाक्यपूर्ति कीजिए–)

**(क)** 1. ____ धमनं भवति। (धर्मम्, धर्मे, धर्मः)

2. व्याघ्रस्य पिपासा ____ अभवत्। (शान्तम्, शान्तः, शान्ता)

3. पुत्री ____ नमति। (मात्रम्, मातरम्, मातारम्)

4. अनुजः ज्येष्ठां ____ प्राणमत्। (स्वसरम्, स्वसृम्, स्वसारम्)

5. व्याधः व्याघ्रं ____ बहिः निरसारयत् (निः+असारतय्)। (जालेन, जालम्, जालात्)

6. अहं त्वां जाले बद्धं ____ द्रष्टुमिच्छामि। (प्रत्यक्ष, प्रत्यक्षम्, प्रत्यक्षः)

**उत्तरम्–** (क) 1. धर्मे 2. शान्ता 3. मातरम् 4. स्वसारम् 5. जालात् 6. प्रत्यक्षम्

**(ख)** 1. चञ्चलः लोमशिकायै निखिलां कथां ____ । (अनिवेदयत्, निवेदयत् न्यवेदयत्)

2. जनाः वृक्षेभ्यः कष्टं ____ । (ददन्ति, ददाति, ददति)

3. अहं त्वां जालात् ____ । (मोचिष्यामि, मुञ्चिष्यामि, मोचयिष्यामि)

4. जनाः नदीजले मालिन्यं ____ गच्छति। (विसर्ज्य, विसृज्य विसर्जयित्वा)

5. ____ दिवसे चञ्चलः वने गतवान्। (अन्ये, अन्य, अन्यस्मिन्)

**उत्तरम्–** (ख) 1. न्यवेदयत् 2. ददति 3. मोचयिष्यामि 4. विसृज्य 5. अन्यस्मिन्